अथसिद्धांतचंद्रिकाउत्तरार्द्धप्रारंभः

॥श्रीकाशीविश्वनाथपुरीमें महल्लाछोरकीपियरीपर बाबू कोलेश्वरसिंह के मकानमें बाबू किशुनदयालसिंह के गणेशप्रभाकर छापाखानेमें छापा गया जिसे लेना होय उसे चौक में नईसडक पर बाबू कोलेश्वर सिंह के दुकानपर मिलैगा
शोधा बालशास्त्री प्रभुणे ने लिखा हरिनंदन· छापने वाला रामदत्त ॥ ६ ॥ ६ ॥ ६ ॥ ॥ ॥

सि॰चं॰ ॐ श्रीगणेशाय नमः सार्वीयं सच्चिदानंदं नामं नामं जगत्प्रभुं सिद्धांतचंद्रिकाव्याख्यानवृत्तिश्च क्रियते नराम् १ धातोः अधिकारोयं प्राङ्नाम्नो यद्यस्ततः
आ॰उ॰ किमर्थीयमधिकारः उच्यते ऊरीकरोति भुक्तौ भवति सहायी स्यादित्यादौ ऊर्यादिच्व्यंतयोर्धात्वोः प्राग्प्रयोगस्य नियतत्वेन विशिष्टात् प्रत्ययोत्प
१ त्तिर्यथा न स्यात् अन्यथा ऽदृष्टित्वयोर्दीर्घो दुर्वारः स्यादित्यधिकारः भ्वादिः भवनं भूः क्रियासामान्यं आदत्ते ग्राहयत्यर्थमित्यादिः अंतर्भावितण्यर्थः यद्वा
दीयते गृह्यते ऽर्थो ऽनेनेति आङ्पूर्वाद्दाञः किप्रत्ययः शब्द इति यावत् भुवः क्रियासामान्यस्य भ्वादिर्वाचकः शब्दो धातुसंज्ञो भवति एवं सति हि रुक् नाना
इत्याद्यवः ऽय्ययेव भूव बभूवे इत्यादाववाख्यातां ते चातिव्याप्तिस्तेषामपि क्रियावाचकत्वात् अतो भ्वादिरित्यावर्त्य भूरादिर्येषेति बहुव्रीहिर्व्या
ख्येयः अत्रादिशब्दो व्यवस्थायां तेन भूशब्दादारभ्य ये पठितास्ते ग्राह्याः तेन क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वं नाम धातूनां स धातुरितिवच

धातोः इदमधिक्रियते भ्वादिः क्रियावाची भ्वादिर्धातुसंज्ञकस्स्यात् आदनुदात्तङितः अनुदात्तेतो ङितश्च धातोरात् ॥६॥

नाद्धातुत्वं सौत्रास्तु गणोक्ता एव ग्राह्याः का पुनः क्रिया उच्यते करोत्यर्थभूता उत्पादना ऽपरपर्याया उत्पत्त्यनुकूलव्यापारसंतानरूपा भावनैव क्रिया न त्वस्ति भवति
विद्यतिषु क्रियावाचित्वमव्याप्तं न हि तत्रोत्पादना प्रतीयते उत्पत्तिर्हि आद्यः क्षणसंबंधस्तदनुकूलव्यापारश्चोत्पादना तदनुभवश्चास्त्यादिभ्यो नास्त्ये
व उच्यते असीत्यादेः स्वरूपधारणं करोतीत्यर्थः धारणं चोत्तरकालसंबंधः क्रियावचनः किंया: पश्यसीत्यादौ धातुत्वं मा भूत् सति हि तस्मिन्नातो धातो
रित्यालोपः आदनुदात्तङितः अनुदात्तश्च ङ् च अनुदात्तङौ तावितौ यस्य धातोः सोनुदात्तङित्तस्मान्नुहुंह्वाते श्रूयमाण इच्छब्दः प्रत्येकमभिसंब राम १
ध्यते हुं हे ऽत्यस्वरेतिङस्य पूर्वनिपातो न हसांतत्वात् ण्यायनेणित्यादिज्ञापकसिद्धं हि तत्तज्ज्ञापकसिद्धं न सर्वत्रेति देवतेदमर्थे इत्यादि ६ ॥ ६ ॥ ६

नाचतस्यानित्यत्वाच्च अनुदात्तेतोङितश्च धातोरात्मनेपदं भवति एधते शेते अन्यपदार्थत्वेन धातोराश्रयणात् किं अगमत् अशिश्रियत् ङोर्ङित्वेपि धा
तुत्वाभावादात्म॥ ञित्स्वरितेत उभे ञ् इत् यस्य स ञित् स्वरित् इद्यस्य स्वरितेत् ञिच्च स्वरितेच्चानयोः समाहारः ञित्स्वरितेत् तस्मात् उभयपदं आत्म
संनिहितमेव पंतु णित्ये इत्यतः परामृश्यते परतोन्यत् परस्मादिति परतः तत्रादिर्विभक्त्यर्थे इति पंचम्यंतात्तस् परत्वस्य सावधित्वादवध्यपेक्षायाम
नुदात्तङित इत्यादयः संबध्यंते अन्यस्यापि सापेक्षत्वादादुभे चेति संबध्यते अनुदात्तेतोङितोनिविशादेर्ञितः स्वरितेतश्च धातोः परतोऽस्माद्
तोः केवलं पंभवति नव पंपराणात् प्रत्येकं मष्टादशवचनात्मका दशविधा आख्याता उक्तास्तेषां नवनववचनानां संज्ञानं विधीयेतेति तिबादीनामा

ञित्स्वरितेत उभे ञितः स्वरितेतश्च धातोरात्मनेपदे स्तः परतोऽन्यत् उक्तनिमित्तहीनाद्धातोः पं नव पं तिबादीनामाद्यानि नवव
चनानि पं संज्ञानि पराण्यात् पराणि नववचनानि आत्मनेपदानि स्युः नाम्नि च युष्मदि च अस्मदि च भागैः तिबाद्येकार्थेषु नामा
र दिषूपपदेष्वेते प्रत्ययास्त्रिभिर्भागैः स्युरास्वयोः नाम्नि प्रयुज्यमाने चाद ऽ प्रयुज्यमाने प्रथमः युष्मदि मध्यमः अस्मद्युत्तमः।

यानि नववचनानि पं संज्ञानि पराणि न वा संज्ञानि पराणीति परशब्देन नव पमित्यत्राऽऽद्यानीति लभ्यंते नाम्नि च युष्मदि चास्मदि च भागैः अत्र पात्
शब्दावऽनुवर्त्तौ सप्तम्या विपरिणमयितव्यौ आद्रू वीत्यादेः कर्मणि कर्त्तरीति चानुवर्त्तते नामादिशब्देन विभक्त्यंतं गृह्यते प्रकरणात्तिबादयो दश
विधा आख्याता गृह्यंते नामाद्यर्थे कर्त्तरि कर्मणि च विहितानां तिबादीनां धातोर्यानि नववचनानि तानि त्रिभिर्भागैर्विभज्य प्रयोक्तव्यानि यथा स
स्येन नामार्थे कर्त्तरि प्रयुक्तेऽप्रयुक्ते च प्रथमो भागः प्रयोक्तव्यः स पचति तौ पचतः ते पचंति स पचते तौ पचेते ते पचंते अप्रयुक्ते पचति पचतः
पचंति पचते पचेते पचंते नामार्थे कर्मणि ओदनः पच्यते ओदनौ पच्येते ओदनाः पच्यंते अप्रयुक्ते पच्यते ॥ ६ ॥ ६ ॥ ६ ॥

अ

सि॰चं॰ पच्येते पच्यंते पंतु कर्मणि नास्ति युष्मदर्थे कर्तरि त्वं पचसि युवां पचथः यूयं पचथ त्वं पचसे युवां पचेथे यूयं पचध्वे अप्रयुक्ते पचसि पचथः पचथ पचसे
आ॰उ॰ पचेथे पचध्वे युष्मदर्थे कर्मणि प्रयुक्ते त्वं दुःखी क्रियसे रोगैः युवां दुःखिनौ क्रियेथे यूयं दुःखिनः क्रियध्वे अप्रयुक्ते क्रियसे क्रियेथे क्रियध्वे अस्मदर्थे
२ कर्तरि प्रयुक्ते अहं पचामि आवां पचावः वयं पचामः अहं पचे आवां पचावहे वयं पचामहे अप्रयुक्ते पचामि पचावः पचामः पचे पचावहे पचामहे अ
स्मदर्थे कर्मणि प्रयुक्ते विरागैः सुख्यहं क्रिये आवां क्रियावहे वयं क्रियामहे अप्रयुक्ते क्रिये क्रियावहे क्रियामहे त्वया पच्यते मया पच्यते इत्यत्र युष्मदा
द्यर्थे आख्यातस्य विधानाभावान्न मध्यमोत्तमौ प्रथमातिक्रमेण कारणाभावात्प्रथम एव ननु इह भवान्पचति इत्यत्र मध्यमः प्राप्नोति भवद्युष्मच्छब्द च
योरेकार्थत्वादिति चेन्न तयोरर्थभेदात् अलिंगः संबोधनविषयश्च युष्मदर्थः भवदर्थस्तु लिंगवान्न च संबोधनैकविषय इति त्वद्रूपः त्वत्कल्पः त्वत
रः पचसि मद्रूपः मत्कल्पः मत्तरः पचामीत्यत्र तरादेर्विशेषणत्वेनाकर्तृत्वात् युष्मदस्मदर्थस्यैव कर्तृत्वात् मध्यमोत्तमौ भवतः अतित्वं प्रियत्वं पचति
अत्यहं प्रियाहं पचतीत्यत्र पूर्वपदान्यपदार्थयोः प्राधान्येन कर्तृत्वात् युष्मदस्मदर्थयोर्गौणत्वेन कर्तृत्वाभावात्॥ न मध्यमोत्तमौ एवमऽत्वं
त्वसंपद्यते त्वद्भवतीत्यादावपि च्व्यंते हि संघी भवंति ब्राह्मणा इत्यनुरोधेन प्रकृतेः कर्तृत्वं विकृतेः कर्तृत्वे तु संघीभवति ब्राह्मण इति स्यात् अत्र
पि युष्मदस्मदर्थयोः विकृतित्वेनाकर्तृत्वेनाकर्तृत्वं तदुक्तं यदाद्यर्थे विनिर्देश्ये भवतो युष्मदस्मदी द्वयोरपि तयोर्योगेन धातोर्मध्यमोत्तमौ प्र
कृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्न तु॥२॥ अत एव मृद् घटो भवति ओदनस्तंडुला भवंतीति प्रयुज्य
तेति वादिभिः सह एकोऽर्थो येषां ते तेति बाद्येकार्थास्तेषु तिवादीनां यः कर्त्रादिरित्यर्थः स एव कर्त्रादिरर्थो नामादीनामित्यर्थः तिबाद्येकार्थे राम २
ष्विति किं त्वां पश्यति त्वया क्रियते तुभ्यं ददाति॥

॥ ॥

प्वाद्विधानात् कथं निर्ण
कर्त्तरि पंच कर्त्तरि वाच्ये धातोः पं भवति चकारात् द्वादपि पचति आख्यातप्रत्ययेनोक्तत्वात् कर्त्तरि प्रथमा नानुभावकर्मकर्त्तृ शय्यते आस्यते नरेणेत्यत्र कर्त्तरि तृतीयादर्शनात्
यः स्यात् नैव प्रयोगान्निर्णयसंभवात् आस्ते शेते नर इत्यत्र कर्त्तरि प्रथमादर्शनात् कर्त्तर्येव तृतीयाया अद
भावे आत् चक्रे करिष्यते वा घटं कुलाल इत्यत्र कर्त्तर्येव चक्रे करिष्यते वा घटः कुलालेनेत्यत्र कर्मण्यात् कर्मणि प्रथमायाः कर्त्तरि तृतीयाया अद
र्शनात् लवीष्ट कर्त्तेत्यत्र च ऽनिर्णय एव यथा रामाभ्यामित्यत्रा ऽनिर्णयः वर्त्तमानेति पतस् अंतिसि पथस् थमिपुवस् मसत्ते आते अंते से आथे
ध्वे एवहे महे व्यापारे इति शेषः व्यापारः क्रिया सा च धातोर्वाच्या सा त्रिविधा अतीता ऽनागत वर्त्तमानभेदात् तत्र वर्त्तमानक्रियावृत्तेर्द्धातोस्तिबादयोभ
वंति तिच द्योतका वर्त्तमानक्रिया धातुनैवोक्तत्वात् यदि तु सप्तम्यादिरित्यतः काले इत्यनुवर्त्तते वर्त्तमाने काले वाच्ये तिबादयः इति व्याख्यायते तदा तिब

कर्त्तरि पंच चादात् भूसत्तायां वर्त्तमानेति पतस् अंतिसिप थस् थमिपुवसमस् तेआते अंते से आथे ध्वे एवहे महे वर्त्त
मानार्थक्रियावृत्तेर्द्धातोस्तिबादयः प्रत्यया भवंति एषां संज्ञा लट्॥

दयः वाचका अपि भवंति कालस्य धातुना ऽभिहितत्वात् अथ को वर्त्तमानः प्रारब्धा ऽपरिसमाप्तो वर्त्तमानः भूरस्तीत्यादौ कथं वर्त्तमानादिः प्रारब्धापरिस
माप्तत्वाद्यभावात् उच्यते सृष्टिसंहारश्रुतिप्रामाण्यस्वीकर्त्तॄणां मते ऽत्राप्यस्ति वर्त्तमानत्वं कल्पादौ प्रारब्धायाः स्थितेरपरिसमाप्तत्वात् तस्युः पर्वतो भवि
ष्यति भूरित्यादौ त्वऽतीतानागतकल्पावा ऽऽदाय भूत भविष्यते वो ध्येक्रियाफलयोर्वाचको धातुः कालः संख्या कारकं चाख्यातार्थः तत्रातिबादित्वेन
कालो र्थः तिप्तस्त्वादित्वेन एकत्वद्वित्वबहुत्वरूपाः संख्यार्थाः आत्वेन भाव कर्मणो अर्थः आत्वेन पत्वेन च कर्त्तार्थः तत्र फलस्य कर्मण्यन्वयः फलाश्रयस्य कर्मत्वा

सि·चं·
आ·उ·
३

व्यापारस्यकर्त्तर्यन्वयोधातूपात्तव्यापाराश्रयस्यकर्तृत्वात्संख्यायास्तुकर्त्तरिप्रत्ययेकर्त्तर्यन्वयः कर्मणिप्रत्ययेकर्मण्यन्वयः कालस्यक्रियायामन्वयः
कर्तृकर्मणीक्रियाविशेषणेक्रियातुविशेष्येतिशाब्दिकमतंवर्तमानोऽर्थोयस्याःसावर्तमानार्थासाचासौक्रियाचेतिशाकपार्थिवादित्वान्मध्यमपदलोपः
वर्तमानक्रियासावृत्तिर्यस्यसतथातस्मात्तिवित्यादेःसमाहारेएकपद्यंअन्यथासमासेत्वष्टादशपदत्वंअपकर्त्तरिकर्त्तरीतिनापोऽभिधेयमाख्यातो
क्तत्वात्किंत्वनुवृत्तस्यचतुर्थ्यिंत्यस्यविशेषणंधातोरप्स्यात्कर्त्रर्थेषुचतुर्षुपरतःअपःपित्वमपित्तादेर्ङित्तिङित्वाभावार्थंअन्यथाभवतइत्या

अपकर्त्तरिकर्त्रर्थेषुतिबादिषुचतुर्षुदिव्यर्थ्येतेषुपरतोधातोरप्स्यात्गुणः।
नाम्यंतस्यधातोर्गुणोभवतिअपित्तादेर्ङित्पकारेतंतादिकंचविहायअन्यप्र
त्ययोङित्स्यात्क्ङित्यद्युसिकितिङित्तिचपरेवृद्धिगुणौनद्विर्वचनहेतुकेउसि
गुणःस्यातइतितसिगुणाःप्राप्तौअपनिमित्तोगुणःभवतः॥ ७ ॥ ७ ॥ ॥

ङेरिङित्वाद्गुणोनस्यात्गुणः अरेदोनामिनइतिनियमान्नामिग्रहणंतस्यधातोर्विशेषणत्वात्तदंतविधिःअपित्तादेर्ङित्पइत्यस्यसपित्तआ
दिर्यस्यसःतादिःपिच्चतादिश्चपित्तादीताभ्यामन्योऽपित्तादिःनञ्जित्सिसमासःङित्ङिद्वदित्यर्थःअत्रपर्युदासबलात्पित्तादिभिन्नःप्रत्ययएवगृ
ह्यतेनधातुःननुसादेःकृतांचानेनङित्वंकुतोनेतिचेन्मैवंयङ्नङोर्ङित्करणात्ज्ञापकात्नानिर्दिसेइतिसूत्रारंभाच्च अतःपरिशेषात्तिवादीनां
चतुर्विधानामाख्यातानांतद्धिकरणानांचानेनङित्वंनान्येषांतेनबिभरांचकारेत्यादावामोनङित्वंक्ङित्यद्युसिकचङ्चक्ङौतावित्तौयस्यसतथातस्मि राम
न्अद्युसीतिविशेषणंद्वित्वनिमित्तेउसिनअजुहवुः॥ ३

अदे अत्र एवेति पृथक्कादे अविभक्तिके अत इत्यनुवृत्तं अतो लोपो भवति अति   एति च परे भवंति पचे अतः किं ब्रुवंति ब्रुवेत परः किं यांति रौः आख्या
तप्रकरणे एवायं विधिस्तेन नस्यादावति व्याप्तिः ओ राव् च म् च ओ त्तयोः अत आत्वं भवति वोः भवामि भवावः भवामः अतः किं चिनुवः चिनुमः आख्यात
प्रकरण एव युगपत्प्राप्तौ परः स च त्वं च पंडितौ भवथः अहं च स त्वं च पंडिता भवामः इत्यत्र त्रयाणां नामाद्यर्थानां कर्तृत्वे नैकदा प्राप्तौ परत्वात् मध्यमोत्तमौ भव
तः उक्तं च एकदा चेत् क्रियाकालसंबंधप्रतिपादनं धातोर्नामादिषूक्तेषु यः परः स प्रमान् भवेत् १ परत्वं चाभिधायकसूत्रापेक्षया न प्रयोगापेक्षया ग्राह्यं असम
दर्थस्यैकत्वेपि समुदायाश्रिता संख्या ग्राह्या तदुक्तं द्वयोर्नाम्नोर्बहूनां वा यदि वा कोपि समुच्चयः नामत्रयाश्रिता संख्या कृतिबाधो विशेषणं १ स च त्वं च अहं

अदे अतो लोपो भवत्यकारे एकारे च परे भवंति भवसि भवथः भवथ ओ रा वमयोः परयोरत आत्वं स्यात् भवामि भवावः भवामः स भ
ति त्वं भवसि अहं भवामि युगपत्प्राप्तौ परः स च त्वं च भवथः अहं च त्वं च भवावः अहं च त्वं च स च भवामः विधिसंभावनयोः यात् या
ताम् युस् यास् यातं यात यां याव याम ईत ईयातां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि विधिः कर्तव्यार्थोपदेशः ॥ ६ ॥

चाहमिति विवक्षायां त्वेकशेषो भवति संख्या तु समुदायाश्रिता विधिसंभावनयोः यात् याताम् युस् यास् यातं यात यां याव याम ईत ईयाताम् ईरन् ईथास् ईया
थां ईध्वं ईय ईवहि ईमहि धातोर्यादादयः प्रत्ययाः स्युः विधिसंभावनयोर्वाच्ययोरित्ययं वाचकतापक्षः न चात्र पक्षे विध्यादिनार्थेन कर्त्राद्यर्थबाधो विरोधा
भावात् यद्वा विधिसंभावनयोर्वर्तमानाद्धातोर्यादादयः प्रत्ययाः स्युः विध्याद्यर्थस्य विशेष्यस्य प्रकृत्यर्थविशेषणत्वे द्योतकतापक्षोयं विपूर्वाद्धातोरंतर्भा
वितण्यर्थात् डुकृञ् किरिति भावे किः विधविधाने इत्यस्मादंतर्भावितण्यर्थाद्वा किः विधानं वेधनं वा विधिः अनुष्ठापनं कारणा प्रवर्तनेति यावत् ॥ ६ ॥

सि॰ चं॰ आ॰ उ॰ ४

साप्रवर्त्तना श्रुतिवाक्यनिष्ठा लौकिकवाक्ये पित्रादिवक्तृनिष्ठा संपूर्वकाङ्क्षवते श्चौरादिकाद्वा प्रेरणोस्त्वार्थे वाक्त्रिः भावेयुइ ततः स्त्रियामाप्॥ ॥संभाव
नाकल्पना ऊहः कर्त्तव्यः करणीयोर्थस्तस्योपदेशे विधिः या अविभक्तिको निर्देशः अतः परो याइः स्यात् अतः किंसुयान्तपरः किंयायात् युसइट् अतः पर
स्ययुस इट् स्यात् टित्वादादौ यामियम् अतः किंयुयान्तपरः किंयायां आशीः प्रेरणयोः तुप्तां अंतुहितं त आनिप् आवप् आमप् तां आत्तां अंतां स्व आयांध्वं
ऐप् आवहै प् आमहै प् थानोस्तुवादयः सुः आशीः प्रेरणयो र्वाच्ययोः आशीः प्रेरणयोर्वर्त्तमानाद्धातो रित्तिद्योतकता पक्षः आशासनमाशीः आङः शासु

संभावनं कल्पनं तत्र यादादयः एषां संज्ञा लिङ् या अतः परो याइः स्यात् भवेत् भवेतां युस इट् अतः परस्य युस इडागमः स्यात् भ
वेयुः भवेः भवेतं भवेत यामियं अतः परो यामियं स्यात् भवेयं भवेव भवेम शिष्यो गुरुशुश्रूषको भवेत् विधिः भवेद सो वेदविद् ब्राह्मण
त्वात् आशीः प्रेरणयोः तुप्तां अंतु हितं त आनिप् आवप् आमप् तां आत्तां अंतां स्व आयांध्वं ऐप् आवहैप् आमहैप् अप्राप्ते प्रार्थन
माशीः परस्येष्टार्थशंसनं वा प्रेरणा प्रवर्त्तनं तत्र तुवादयः एषां संज्ञा लोट् तुह्योस्तातङ्ङाशिषि वा भवतु भवतात् भवतां भवंतु॥ ६॥

रिच्छायां ततः क्विप् आत इत्वं निपातितं षत्वं प्र पूर्वा दीर्गतावित्यस्मात् प्रेरणार्थे ण्यंताद्वा वेयुट् प्रेरणा प्रवर्त्तना विधिशब्दार्थ एव आशीश्च प्रेरणा च आ
शीः प्रेरणे तयोः आशासनं चाप्राप्तस्यैव संभवतीत्यः प्राप्त प्रार्थनमाशीः सा च स्वस्य परस्य च संभवति परस्येष्टार्थशंसनं वा आशीरिदमप्यप्राप्तविषय
मेव यद्यपि यादादितुवादयो न कालविशेषे विहितास्तथापि भविष्यत्काले ऽगम्यते ऽतीतवर्त्तमानयोर्विध्याद्यसंभवात् तुह्योस्तातङ्ङाशिषि वा तुश्च हि राम
श्च तु ही तयोः अनन्यार्थे ङित्तोङित्वमंत्यादेशं प्रयोजयति अत्र तु गुणवृद्धिप्रतिषेधे संप्रसारणे चरितार्थत्वात् ङित्वस्य नांत्यादेशता ब्रूतात् मृष्टात् उष्टादित्या ४

अतः स्थानिवद्भावेन तातङो ङित्वेपि लोपो न ओर्वी हेरित्यतो वेत्यनुवृत्तस्य व्यवस्थितत्वेन स्वीकारात् अनद्यतनेऽतीते दिप् तां अन् सिप् तं त अमिप् व म तन् आ
तां अंत थास् आथां ध्वं ई वहि महि अनद्यतनेऽतीते काले द्योसे वाच्ये वा धातोर्दिबादयो भवंति अस्मिन्नहनीत्यद्य अद्यशब्दवाच्यः कियान् कालः अतीतरात्रेरंति
मयामद्वयमागामिन्याः प्रथमं यामद्वयं मध्यवर्ती दिवसः स कालः एषोऽद्यशब्दवाच्यः कालः अद्यभवोऽद्यतनः त्यतनावितितनः अद्यतनकाल
स्त्रिविधः अतीतोऽनागतो वर्तमानश्च तत्राद्यतने अतीते भूते सिः अद्यतने वर्तमाने तिबादिः अद्यतनेऽनागते लुट् नास्त्यद्यतनो यस्मिन्निति

अतः अतः परस्य हेर्लुक् स्यात् भव भवतात् भवतं भवत भवानि भवाव भवाम अध्ययनायोद्यतो भव सौम्य आयुष्मान् भवतु भ
वान् अनद्यतनेऽतीते दिप् तां अन् सिप् तं त अमिप् व म तन् आतां अंत थास् आथां ध्वं ई वहि महि अतीताया रात्रेर्यामद्वयादर्वा
ग्यावदागामिन्याः प्रथमं यामद्वयं दिवसः स कालः सोद्यतनः नास्त्यद्यतनो यस्मिन्नतीते काले तत्र दिबादयः एषां संज्ञा लङ् इ
सि मौ नामिकारोच्चारणार्थः दिवादावट् धातोः अभवत् अभवतां अभवन् अभवः अभवतं अभवत अभवं अभवाव अभवाम
ह्यो भवत् त्वत्पुत्रः परोक्षे णप् अतुस् उस् थप् अथुस् अ णप् व म ए आते इरे से आथे ध्वे ए वहे महे ॥ बहुव्रीहिः पक्षे अद्यतनादन्योऽन
द्यतन इति नञ्तत्पुरुषः अन्स्वरे इत्यन् नाम्नो नो लोपशिति नलोपस्तु न विधानसामर्थ्यात् तस्मिन्नद्यतने काले दिवादिरर्थाद् परोक्षे परोक्षेणा
दिविधानात् दिवादावट् दिवादाविति सप्तमीनिर्देशादबादिव्यवधानेऽप्राप्तावादावडेव पश्चाद्दिवादिः परोक्षे णप् अतुस् उस् थप् अथुस् ॥ अ णप्
व म ए आते इरे से आथे ध्वे ए वहे महे अनद्यतनातीतपरोक्षार्थक्रियावृत्तेर्धातोर्णबादिरिति द्योतकतापक्षः अनद्यतनातीतपरोक्षार्थे णबादिरि
ति वाचकतापक्षः अक्ष्णः परः परोक्षः टाङकार इत्यः यस्य लोपः अक्षादिंद्रियात्पर इति वा क्वचिददमाद्यंतस्य परत्वमिति पंच १ ॥ ६ ॥ १ ॥

स्यं तस्य परत्वं परशब्दस्याकारस्यौकारो निपातनात् ॥ ❁ द्विश्च णवादी इत्यनुवृत्तं सप्तम्या विपरिणम्यते धातोर्द्विर्वचनं भवति णादौ परे द्वौ वारौ विति द्विः द्विस्त्रिच
तुर्भ्यं इति क्रियावृत्तौ सुः अत्र क्रियावाचकं विना क्रियावृत्तेरसंभवाद्वचनमित्यध्याह्रियते तच्च कर्दंतं तदपेक्षया धातोरिति कर्मणि षष्ठी धातोर्द्वे उच्चार
णे कर्तव्ये इत्यर्थः अनंतरस्येति न्यायेनोक्तणादि योगेनैव द्वित्वं न विदीनवानामिति विहितनादियोगे अत्र द्विर्वचनं द्विः प्रयोग एव न त्वादेशः तेनतु
तोसे त्यादौ कृतस्य सस्याभावात् षत्वं न सस्वर आदिर्द्विरद्विः अद्विरुक्तः किंबो भूयिषते णादिः कित् अपित्तादिर्डिदित्यतोऽपिदित्यनुवृत्तं णआदिर्यस्या

धातोः परोक्षेऽतीते कालेणबादयः एषां संज्ञा लिट् द्विश्च उक्तार्थणवादियोगे धातोर्द्विर्वचनं सस्वरादिर्द्विरद्विः अनेकस्वरस्य धा
तोः सस्वराद्यो वयवोऽद्विरुक्तो द्विर्भवति णादिः कित् अपित् णादिः कित् आभ्वोर्णादौ पूर्वस्याकारस्य भूशब्दस्य चाकारो णादौ प
स रेह्रस्वः पूर्वसंबंधिनो दीर्घँ ह्रस्वः झपानां जबचपाः पूर्वस्य झपानां जबाश्चपाः स्युः झडधघभानां जडदगबाः खफछठथा
नां चटतकपाः स्युः ॥ भुवो वुक् भुवो वुगागमो णादौ स्वरे बभूव बभूवतुः बभूवुः ॥ ❁ ॥ ६ ॥ ७ ॥ ❁ ॥

ऽष्टादशात्मकस्य समुदायस्य सनादिः कित् किद्वत्कार्यातिदेशोयं ईजतुः जुहुवतुः आभ्वोर्णादौ अश्च भूश्च अभ्वौ तयोः पूर्वस्य हसादिरित्यनुवृत्तः पू
र्वसेत्यनुवृत्तं ह्रस्वः पूर्वस्य स्वरस्य ह्रस्वः स्यात् बभूवेत्यत्र तु आभ्वोरिति कृतस्य दीर्घस्य ह्रस्व इत्यर्थः झपानां जबचपाः वर्ग्या वर्ग्यैर्यथासंख्येन स्थाने क्या
आदेशा भवंति भुवो वुक् कृताकृतप्रसंगित्वेन नित्यत्वात्प्रथमं वुक् ततो वुको धात्ववयवत्वाद्गुणवृद्धी न ॥ ६ ७ ॥ ❁ ॥ ६ ॥
॥ ॥ ॥

कादेर्णादेः डुकृञ् करणे कृञ् हिंसायामित्युभौ शृह्येते स्मृ गतौ भृञ् भरणे डुभृञ् धारणपोषणयोरित्युभौ वृङ् संभक्तौ वृञ् वरणे इत्युभौ द्रु गतौ ष्टुञ् स्तुतौ श्रु श्रवणे स्रु गतौ एते कादयः कृसृभृ इति त्रयाणामनुदात्तत्वान्नैकस्वरादिति प्रकृत्याश्रये इण्निषेधे प्राप्ते वृङ् वृञोरूदात्तत्वात् कित इति प्रत्ययाश्रये इण्निषेधे प्राप्ते द्रुस्त्वादीनां चतुर्णां स्वरान्तत्वात् स्वरान्ताद्वत् थे तीड्विकल्पे च नियमः आशिषि यात् यास्तां यासुः यास् यास्तं यास्त यासं यास्व यास्म सीष्ट सीयास्तां सीरन् सीष्ठाः सीयास्थां सीध्वं सीय सीवहि सीमहि धातोर्यादादयः आशीर्वादे वाच्ये यद्वा प्रार्थ्यमानक्रियावृत्तेर्धातोरिति वा
ह

कादेर्णादेः कृसृभृञ्द्रुस्तुश्रुस्रु इत्येतेभ्यः परस्य वसादेर्णादेरिड् न भवति अन्यस्मात् भवतीति नियमादिट् स्यात् बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम बलिर्बलवान् बभूव आशिषि यात् यास्तां यासुः यास् यास्तं यास्त यासं यास्व यास्म सीष्ट सीयास्तां सीरन् सीष्ठाः सीयास्थां सीध्वं सीय सीवहि सीमहि धातोराशिषि यादादयः एषां संज्ञा लिङ् आशीर्यादादेः पंक्तित् भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म सः श्रीमान् भूयात् श्वस्तने ता तारौ तारः तासि तास्थः तास्थ तास्मि तास्वः तास्मः ते तातारौ तारः तासे तासाथे ताध्वे ताहे तास्वहे तास्महे श्वोभाविन्यर्थे तादयः एषां संज्ञा लुट्॥

आशीर्यादादेः पंक्तित् न लुङि त्वे नैव गुणवृद्धिनिषेधः सिद्ध इति चेन्न इज्यात् सुप्यादित्यादौ संप्रसारणार्थं जागर्यादित्यादौ जागर्तेरिति गुणार्थं च किद्वचनं श्वस्तने ता तारौ तारः तासि तास्थः तास्थ तास्मि तास्वः तास्मः ते तारौ तारः तासे तासाथे ताध्वे ताहे तास्वहे तास्महे आगामिदिने श्वोव्ययं श्वोभवः श्वस्तनः कालस्तस्मिन् वाच्ये धातोस्तादयः यद्वा श्वस्तने व्यापारे वर्तमानाद्धातोरिति वा॥

सि॰ चं॰
आ॰ उ॰
६

सिसतासीस्यपामिट् धातोरित्यनुवृत्तं स्यादौ भविष्यतिस्यपतिरादिर्यस्य तस्मिन् भविष्यत्यर्थे वर्तमानाद्धातोः स्यप्रत्ययो भवति स्यादौ परे इति भविष्यत्वं
द्योत्ययद्धा धातोः स्य भविष्यति कालेवाच्येति वादौ परे भविष्यतीति शत्रंतात्सप्तमी स्यप्रक्रियातिक्रमे क्रियायाः अतिक्रमः अनिष्पत्तिः असिद्धिरि
त्यर्थः भविष्यतीत्यनुवृत्तं उत्तरसूत्राद्भूते इति च भूते भविष्यति चार्थे वर्तमानाद्धातोर्दिवादिर्भवति क्रियायाः निष्पत्तौ गम्यायां दिवादौ च परे स्यप् भवति यद्धा धा

सिसतासीस्यपामिट् भविता भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः श्वो भ
विता राज्यभारः कुमारस्य स्यादौ भविष्यति स्यप् धातोर्भविष्यति काले स्य प्रत्ययो भवति बाद्यष्टादशसु परतः एषां संज्ञा लृट् भ ति
विष्यति भविष्यतः भविष्यंति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः कल्की धर्मपालको भविष्यति स्य
प्रक्रियातिक्रमे क्रियाया अतिक्रमे कुतश्चिदनिष्पत्तौ सत्यां स्यप्रत्ययो भवति दिवादिषु परतः एषां संज्ञा लृङ् यदि सुवृष्टिः
सुराज्यं चाभविष्यत् तदा सुभिक्षमभविष्यत् अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं
अभविष्याव अभविष्याम भूते सिः धातोर्भूतमात्रे काले सिः प्रत्ययो भवति दिवादिषु परतः एषां संज्ञा लुङ् ॥ ६ ॥ ॥

तोर्भूते भविष्यति चार्थे वाच्ये दिवादिर्भवति तस्मिंश्च परे स्यप् क्रियातिक्रमे गम्ये भूते सिः अभूत् इति भूतः अकर्मकत्वात्कर्तरि क्तः भूतसामान्यार्थे वर्त
मानाद्धातोर्दिवादिर्भवति धातोः परः भूतसामान्ये वाच्ये दिवादिर्भवति तस्मिंश्च परे सिप्रत्ययो भवति सिसहितस्य दिवादेर्भूतसामान्योर्थः ॥ अवादि रा म
यद्धा सहितस्य तु भूतविशेषोऽनद्यतनोऽपरोक्षोऽर्थः ॥ ६

दादेः पेदा आदिर्यस्य स दादिस्तस्मात्सेर्लोपः पे परे डुदाञ् दाने दाण् दाने दो अवखंडने इत्येतेषां दाशब्देन ग्रहणं दाप् लवने दैप् शोधने देङ् पालने एषां तुल
स्यानुसारान्न ग्रहणं डुधाञ् धारणपोषणयोः ष्ठा गतिनिवृत्तौ इण् गतौ भू सत्तायां पा पाने शाच्छासाह्वाव्याघ्राधेटां वा एभ्यः सेर्वा लोपः शो तनूकरणे छो छेदने
षो अंतकर्मणि घ्रा गंधोपादाने धेट् पाने भुवः सिलोपे ऽयङ् लुकि गुणो न भुवो गुणो न सिलोपे सति यङि लुकि तु भुवो गुणो भवति सिस्लोपे प्रकृतिग्रहणे यङ् लु
गंतस्यापि ग्रहणमिति परिभाषया गुणनिषेधे प्राप्ते विधिः अभूत् अबोभूत् भुवः सिलोपे स्वरे वुक् भुवो वुगागमः स्वरे परे सिलोपे सति माङि सिरेव माश
दादेः पे वा परे अपि ह्रास्या इण् भू पिबतिभ्यः परस्य सेर्लोपः शाच्छासाह्वाव्याघ्राधेटां वा भुवः सिलोपे अयङ् लुकि गुणो न अभूत् अभूतां भुवः
सिलोपे स्वरे वुक् अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम माङि सिरेव स्मसहिते दिवादिर्वा मेटः माङ् योगे अटो लोपः
मा भवान् भूत् मास्म भूत् मास्म भवत् भूयाद्याशीर्वादान्त्यान् भवते आदायई अतः परस्यात आय आत ई र्भवति भवेत् भवेतां भवेयुः भवेः भवेतं भवेत भवेयं भ
वेव भवेम भवेतां भवेरन् भवेथाः भवेयाथां भवेध्वं भवेय भवेवहि भवेमहि भवतां भवेतां
भवंतां भवस्व भवेथां भवध्वं भवै भवावहै भवामहै अभवत अभवेतां अभवंत अभवथाः अभवेथां अभवध्वं अभवे अभवा
वहि अभवामहि बभूवे बभूवाते बभूविरे बभूविषे बभूवाथे ॥ व्दे प्रयुज्यमाने धातोर्दिवादिपरः शिरेव भवति सर्वेषामाख्यातानां विषये
स्मसहिते दिवादिर्वा स्मोत्तरे माङि प्रयुज्यमाने धातोर्दिवादिर्वा पक्षे भूते सिः सर्वलकारविषये लङ् लुङादि विस्तर्यः मे ऽटः लोप इत्यनुवृत्तं माश
ब्दे प्रयुज्यमाने सत्यटो लोपः भूप्राप्तो आदि इत्येतयस्य आत्वान् आत्मनेपदीत्यर्थः आदायई अत इत्यनुवृत्तं आच्च आच्च आदात् तस्य आते आ
तां आये आथां इत्येतेषां दि विहायानुकरणं अतः परस्य आय आकार ई र्भवति एधेते एधेथे एधेतां एधेथां ॥ ६ ॥ ६ ॥ ७ ॥ ८ ॥ ६ ॥

सि॰ चं॰ नामिनो चतुर्णां धोढः नामिन इति धातोर्विशेषणत्वेन तदंतविधिः सेटो हलाह्वा सेटो हयवर्लात्परेषां सी ध्वं लुङ् लिटां धस्य वा ढः आतोंतो द्नतः अं
३ ति अंते अंतु अतां ते षां वचनानां टिं विहाय प्राग्भावस्यानुकरणं आदितितु अंत्यानां संज्ञे लुक्तं आत्संबंधिनोऽनकारात् परस्यातो अद्भवति आतः
७ किंयुबंति अनत इति किं एधंते तपरः किं गाते ध्वे च सिलोपः ध्वे प्रत्यये परे सिप्रत्ययस्य लोपः चितीसंज्ञाने सम्यग्ज्ञानं संज्ञानं उपधायाल घोः गुण

नामिनो चतुर्णां धोढः। नाम्यंताद्धातोः परस्य सीध्वं लुङ् लिटां धस्य ढः सेटो हलाह्वा बभूविढ्वे बभूविध्वे बभूवे बभूविवहे ब
भूविमहे भविषीष्ट भविषीयास्तां भविषीरन् भविषीष्ठाः भविषीयास्थां भविषीढ्वं भविषीध्वं भविषीय भविषीवहि भविषीमहि भवि
ता भवितारौ भवितारः भवितासे भवितासाथे भविताध्वे भविताहे भवितास्वहे भवितास्महे भविष्यते भविष्येते भविष्यंते भविष्य
से भविष्येथे भविष्यध्वे भविष्ये भविष्यावहे भविष्यामहे अभविष्यत अभविष्येतां अभविष्यंत अभविष्यथाः अभविष्येथां अभवि वि
ष्यध्वं अभविष्ये अभविष्यावहि अभविष्यामहि अभविष्ट अभविषातां आतोंतोऽद्नतः आतो अंतोऽद्भवत्यकारादुत्तरस्यन
अभविषत अभविष्ठाः अभविषाथां ध्वे सिलोपः अभविढ्वं अभविध्वं अभविषि अभविष्वहि अभविष्महि चितीसंज्ञाने उपधा
यालघोः धातोरुपधाया लघोर्नामिनो गुणः चेतति ॥ पूर्वस्य हसादिः शेषः पूर्वस्यादिर्हसः शिष्यंते अन्ये हसो लुप्यंते चिचेत चिचेतिथ सेः।
इत्यनुवृत्तं ह्रस्वं लघुपूर्वस्य हसादिः शेषः आदि आसौ हस श्चेति विशेषणसाप्यनेन परनिपातो ज्ञाप्यते सेः ॥ सिशब्दात्परयोर्दिप्सिपोरीट्।
असेरीट् इत्येतदनुवृत्तं असेरिति सेर्विशेषणं विद्यमानात् सिप्रत्ययात् परयोर्दिस्योरीडागमः विद्यमानात्किम् अदात् अत्र प्रत्ययलक्षणेन सेः परत्व राम ७
मस्तिविद्यमानादिति विशेषणान्नेट् ॥

इटईटि सेरीतिलोप इतिचानुवृत्तं लुङि अचेतिस ईदिति स्थिते सेर्लोपः सिलोपो दीर्घसिद्धो वक्तव्यः दीर्घकर्त्तुं सिलोपः सिद्धो वाच्योनत्वसिद्धः अचेतीत्
इटः किम् अहार्षीत् ईटि किम् अचेतिषाम् स्नाविदः सि श्च आश्च विद्च एषां समाहारः स्नाविद् तस्मात् एभ्यः परस्याऽनउस्स्यात् अत्राऽप्यस्तेरि
त्यनुवृत्त्या विद्यमानात् सेः परस्यान् इति व्याख्यानान्नेह अभूवन् प्रत्ययलक्षणेन सेः किम् अतन्वत् अद्वः अविद्वः च्युतिर् आसेचने आसेचनमा

इटईटि इटः परस्य सेर्लोपः ईटि अचेतीत् अचेतिषां स्नाविदः सेराता विदश्च परस्यान उस् भवति अचेतिषुः च्युतिर् आसेचने
च्योतति च्योतेत् च्योततु च्योतता द्वा अच्योतत् चुच्योत च्युस्यात् च्योतिता च्योतिष्यति अच्योतिष्यत् इरितोवा इरितोधातोर्वाङ
प्रत्ययो भवति पेसेरपवादः अच्युतत् अच्योतीत् श्च्युतिर् क्षरणे श्च्योतति श्च्योतेत् श्च्योततु श्च्योतताद्वा अश्च्योतत् नशसात्वपाः पूर्व
शसात्पराः स्वपाः शिष्यंते न शसाः चुश्च्योत श्च्युस्यात् श्च्योतिता श्च्योतिष्यति अश्च्योतिष्यत् अश्च्युतत् अश्च्योतीत् यकाररहितो
प्ययम् श्चोतति श्चोतेत् श्चोततु श्चोततात् अश्चोतत् चुश्चोत श्चुस्यात् श्चोतिता श्चोतिष्यति अश्चोतिष्यत् अश्चुतत् अश्चोतीत्
मन्थ विलोडने मंथति मंथेत् मंथतु मन्थताद्वा अमंथत् नोलोप इति नलोपे प्राप्ते ऋरसंयोगाणादिरकित् ममंथ ममंथतुः नोलोपः
धातोर्हसांतस्योपधाभूतस्य नकारस्य लोपः किति परे पूजायां याचते नेनिरुपपदात्तु श्चेः क्विपि नमथ्यात् मंथिता मंथिष्यति अमंथिष्य
ऽऽ त् अमंथीत् ॥ ०॥
द्रीं करणं इरितीरितो वेति विशेषणार्थः इरितो वा इरित् यस्य स तस्मात् इरितो धातोर्वाङ् भूतमात्रार्थे दिवादौ पेसेरपवादः
लित्पुषादेरित्यतो ङ इत्यनुवृत्तं न शसा स्वपाः शसप्रत्याहारः मंथ विलोडने आदावपि ऋरसंयोगाणादिरकिदिति इह ऋरसंयोगान्नेति मूलसूत्रं तत्र णा
दिः किदित्यनुवृत्तं ऋश्च संयोगश्चानयोः समाहारः ऋरसंयोगं तस्मात् णादिः किन्नजजरतुः यादादौ कित्वान्नोलोपः मथ्यात् ॥ ई ॥ ई ॥ छ ॥ ई ॥

मा. सि. च. उ. ८

इदितोनुम् इत् इर्यस्य स इदित् तस्य नुम् स्यात् कुहोश्चुः पूर्वस्येत्यनुवर्तते कुश्च हश्च कुहौ तयोः संवार नाद घोष महाप्राण प्रयत्नस्य हस्य तादृश एव वर्गचतु
र्थो झः इदितो न लोपो न इदितो धातोर्नस्य लोपो न भवति नो लोप इत्यस्यापवादः षिधु गत्याम् अयमुदिदित्येके आदेः सः षः ष्वचणचस्य तस्य सः सच्चन्
चस्य तस्य धातोः किं षट् आदेः किम् लषति अणति षोपदेशाना हसेकस्वपस्स्तृसृजस्त्रस्यान्येदंत्याजंतसादयः एकाचः षोपदेशास्युः ष्वष्क स्विद स्वद स्वं
जस्वपि स्मिङः १ दंत्य श्च अच् दंत्याचौ तौ अंते अव्यवहितौ यस्य स दंत्याजंतः दंत्याजंतश्चासौ सश्च दंत्याजंतसः दंत्याजंतसः आदिर्येषां धातूनां ते दंत्याजंतसा
दयः दंत्यांतसादयो ऽजंतसादयश्चैकाचः एकस्वरा धातवः षोपदेशाः कथंभूताः से कृगतौ स्तृप् सृगतौ सृगतौ स्तृ ञ् आच्छादने स्तृ ज विसर्गे स्तृ ञ् आच्छा

कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः इदितो नुम् इदितो धातोर्नुम् कुंथति कुंथेत् कुंथतु कुंथता द्वा अकुंथत् कुहोश्चुः पूर्वस्य
कवर्गहकारयो श्चुत्वं भवति हस्य वर्गचतुर्थः चुकुंथ इदितो न लोपो न कुंथ्यात् कुंथिष्यति अकुंथिष्यत् अकुंथीत् चुविवक्रेसं
योगे चुम्बति षिधु गत्याम् आदेः सः षः धात्वाद्योः षकारणकारयोः सकारनकारौ भवतः सेधति सेधेत् सेधतु सेधता द्वा असेधत् सिषे

दने स्यै शब्द संघातयोः एभ्यो अन्ये उक्तलक्षणस्यातिव्याप्तिं वारयितुमिदं विशेषणम् पुनः कथंभूताः ष्व ष्क गतौ ञिष्विदा गा ।।धसि ध्यात् सेधित्ता ।। ६ ।।
त्वप्र क्षरणे ष्वद आस्वादने ष्वंज परिष्वंगे ञिष्वप् शये स्मिङ् ईषद्धसने एतैः सहिताः एकाचः किम् सोसूच्यते चुरादावदंतोयं दंत्याजंते किम् ख्वस्कुं दे दंसः
केवल दंत्यो न तु दंतोष्ठजो पि ष्वष्कादीनां पृथक् ग्रहणात् तेन स्वाद आस्वादने इत्यस्यासिस्वददित्यादौ षत्वं न णोपदेशानाह अनर्द नादि नाथ ना
ध नंद नक्र नन्द नृतः नर्द शब्दे नट अवस्यंदने चुरादिः नट नृत्तौ विति घटादिस्तु नेह गृह्यते नाटीति दीर्घनिर्देशात् नाथृ नाधृ याञ्चा दौ टुनदि समृ राम ८
द्धौ नक्क नाशने न्दन यें नृती गात्रविक्षेपे एभ्यो ऽन्ये भिन्नाणोपदेशाः नाधृ नंदन्द इति त्रयाणां केचित्सोपदेशतामाहुः ।। ६ ।। ६ ।। ६ ।। ६ ।।

प्रादेश्वतयातौसुनमां प्रादिसंबंधिनः क्विलानप श्वपरेषांस्वादीनांसस्यषः नसादीनांसस्यषः नमादीनांनस्यण श्वषत्वंनिमित्तंक्विलंणत्वनिमित्तंषकाररेफऋ
वर्णाः स्वादीनाह उपसर्गस्यनिमित्तासुनोतिस्यतिस्तौतिस्तोभतिस्थासे नयसेधसिचसंजस्वञ्जां प्रतिमिन्नात्सरेश्वाऽवालंवनाऽऽविदूर्ययोःस्तंभेश्वव्यवाभ्यांभो
जनेस्वन श्वपरिनिभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजादेःस्कभ्नातेश्वसस्यषः व्याख्यासुञ् अभिषवेषू प्रेरणेषो अंतकर्मणिष्टु ञ्स्तुतौष्टुभस्तंभेएषांस्ति
पानिर्देशाद्यङ्लुकिषत्वंनतेनाभिसोषवीति अभिसोषोतीत्यादि प्रागतिनिवर्त्तौसेन येतिव्यंतोनामधातुः सेनया अभियातीतिअभिषेणयतिषिधुगत्यां
षिचक्षरणेषंजसंगेष्वंज परिष्वंगेस्तंभुइतिसौत्रोरोधनार्थः एभिप्रतिवंधेइतितुनगृह्यतेलक्षणप्रतिपदोक्तन्यायेनसौत्रोहिनोपधइतिप्रतिपदोक्तः इदित्वान्नुमिक्ते
तेष्टभिलोक्षणिकस्तेनविस्तभतेइत्यादौषत्वन्नषद्लुविशरणादौप्रतिमिन्नात्किम् प्रतिसीदति आलंबनमाश्रयणम अविदूरएवाविदूर्य्यंसामीप्यंएयः अवष्ट

प्रादेश्वतयातौसुनमाम् प्रादेः परेषांस्वादीनांनमादीनाञ्चधातूनांसकारनकारयोःषकारणकारौ भवतः षत्वणत्वनिमित्तेसतिनिषे
धति। अट्द्वित्वव्यवधानेऽपिषः स्यषेधत्निषिषेधसेधतेर्गतौनषः गंगांविसेधति। षिधू शास्त्रे मांगल्येचं ऊदितोवाऊदितोधातोःपरस्यवसा
ध्वागोःनिरुद्धासमीपेआस्तेइत्यर्थः एतयोः किम् अवस्तब्धोवृषलःशीतेनस्वनशब्देविष्वणतिसशब्दंभुंक्तेइत्यर्थः भोजनेकिम् विस्वनतिवीणासेवसे॥ देरनपीड्वा॰
वायाम् परिषिचनेषिञ्वंधनेक्तांतः सितशब्दः सयशब्दस्तुस्य एदइतिपचादेर्नदतिवाप्रत्ययांतोविषयः षिवुतंतुसंतानेपरिषीव्यतिषहमर्षणेपरि
षहतेसुडागमः परिष्करोतिस्तुस्वंजोः पुनर्वचनंसिवादीनामड्व्यवायेपीतिविकल्पार्थंस्कंभुरोधनेविष्टभ्नातिएतेस्वादयःषोपदेशाएवनमादयइतिसेध
तेर्गतौसेधतेर्नषः उपसर्गस्थनिमित्तान्नस्यर्थंसेधतेःसस्यषत्वंनास्तिपानिर्देशाद्यङ्लुकिगत्यर्थंसेधतेःषत्वं षेधीति अड्द्वित्वव्यवधानेपि षः सितशब्दा
त्प्राक्पंचदशानांसुनोत्यादीनामड्व्यवधानेपिषत्वंअभ्यषुणोत्सितशब्दात्परस्यदशानांस्यादीनांद्वित्वव्यवधानेपिषत्वमित्यर्थः निषिषेध॥ ६ ॥

सि॰ चं॰ विभूषार्थे मंगलेचशास्त्रेशासनेमंगलमेव मांगल्यंस्वार्थे मंगलक्रियेस्यर्थः ऊदितोवा ऊतइद्यस्यस ऊदितत्तस्मात् अनपीतिषण्णांलेट् लिङ् लुट् लृट् लृङ् लुङा
आ॰ उ॰ लकाराणामन्येषामपीत्यादिप्रत्ययानात्रसंज्ञाअप्रत्ययविषयत्ताभावात् स्वरतिसूतिसूयतिधूञ्रधनशनृपदृपद्रुहमुहस्नुहस्निहांच एभ्योपिपरस्यवसादेरनपी
९ ड्वास्वशब्दोपत्तापयोः स्वादिर्गृह्यतेः श्वविकरणत्वात् षूङ् प्राणिगर्भविमोचने आदादिकोदैवादिकश्चगृह्यते न तु षूङ्प्रेरणेतौदादिकः धूञ् कंपने स्वादिस्य:
क्र्यादिस्यश्च न तु धूविधूनने सानुबंधनिर्देशात्तरधहिंसासंराध्योःणश् अदर्शनेतृप प्रीणनेदृपहर्षमोहनयोः द्रुह जिघांसायां मुह वैचित्त्ये स्नु ह उद्गिरणे
स्निह प्रीतौ स्वरतिसूतिसूयतिधूञूदितो वसादेर्णादेर्नित्यमिट् एभ्यः परस्यकितो वसादेर्णादेर्नित्यमिट् भवति स्वरत्यादि विकल्पं बाधित्वा कित इती
स्वरतिसूतिसूयतिधूञ्रधनशतृपदृपद्रुहमुहस्नुहस्निहा त्र स्वरतिसूतिसूयतिधूञ्ञूदित् सादेर्णादेर्नित्यमिट्स्यात्से
धतिसेधेतसेधत्तुसेधताद्धा असेधत् सिषेधसिषेधियतेथोर्धः झषभांताद्धातोस्तकारथकारयोर्धकारो भवतिदधातेर्वर्ज झभेज
बाः सिषेद्ध सेधितासेद्धासेधिष्यतिसेत्स्यति असेधिष्यत् असेत्स्यत् असेधीत् अनिटोऽनामिवतः अनिटो नामिवतश्च धातोर्वृद्धिः
स्यात्सेपरेसौ असैत्सीत् झसात् झसादुत्तरस्यसेर्लोपो झसे असैद्धां असैत्सुः असैत्सं असैत्स्म ॥ इनिषेधे प्राप्तेक्रादिनियमादिड्विधिः तथोर्धः
तश्च थश्च तथौ तयोः आदिजबानामिस्तोझभांतस्येत्यनुवृत्तं पंचम्याविपरिणम्यते झभांतात् किंभूतः दधातेर्नेड् धाञ् धारणादावस्मात्परयोस्त
थोर्द्धौ न धत्तः अनिटो नामिवतः इयमिदं धातोर्विशेषणं यद्यपि धातुः सर्वोप्यनिडेव तस्य इड्विधानाभावात् तथापिनइट् यस्मात्तस्मात्परस्यनादिप्रत्य
यस्येति व्याख्येयं अनिटोधातो रूपधाभूतस्यनामिनो वृद्धिर्भवति पेसौनाम्यंतस्यतु धातोर्नामिनइतिसूत्रेणैव वृद्धिः कार्येति देशोयं नामि विद्यते राम
ऽस्येतिनामिवान् तस्यतडिदादित्वाद्दतुः झसात् ह्रस्वादित्यतोलोपो झसे इत्यनुवृत्तं सेरितिसूत्रं चझसात्किं अचेष्ट झसे किम् असैत्सीत् इट्पक्षे असेधीत् ९

खदस्थैर्ये हिंसायां च चाद्रुक्षणे स्थिरस्य भावः स्थैर्य्यं एयः अत उपधायाः आदिस्वरस्येत्यतो ञ्णितीति वृद्धिरिति चानुवृत्तं अतः किंतु तोद उपधायां किंगण
यतिणवुत्तमो वाणित उत्तमपुरुषसंबंधिणब् वाणि सेसेरित्यनुवृष्यते पेपरे सेर्णि ङ्रवति णइत्यस्य सणित् अणितं णिदित्याहकार्यातिदेशोयं अतो हसादे
र्लघोर्वा वृद्धिः सेटि सौ हसादेर्लघोरकारस्य वा वृद्धिः स्यात् सेटि परस्मैपदे सौ अतः किम् अदेवीत् हसादेः किम् मा अतीत् लघोः किम् अगर्दीत् सेटि किम् अपा
सीत् पे किम् अयतिष्वदस्थैर्ये पवर्गीयादिः प्रादिस्थान्निमित्तान्नेर्नस्य णो गदनदपदपत अपिद्दाधास्यामाङ्·मेङ्·स्यति हंतियातिवाति द्राति प्साति वपतिव
खद स्थैर्ये हिंसायां च खदति खदेत् खदतु खदताद् अखदत् अत उपधायाः धातोरुपधाया अतो वृद्धिः ञ्णिति चखाद णवुत्तमो
वाणित् चखाद चखद पे सेर्णित् अतो हसादेर्लघोर्वा वृद्धिः सेटि सौ अखदीत् अखादीत् व्यक्ता कोर्थेः परिस्फुट वर्णो गद व्यक्ता
यां वाचि प्रादिस्थान्निमित्तान्नेर्नस्य णो गदनदपदपत अपिद्दाधास्या माङ्·मेङ्·स्यति हंति याति वाति द्राति प्साति वपति वहति
शाम्यति चिनोति देग्धिषु अन्यत्राकखादावषांते आद्योच्चारणे वा अकखादौ किम् प्रणिकरोति प्रनि खादति अषांते किम् प्र
निदुष्यति वेति किम् प्रणिभवति प्रनिभवति ॥ इति शाम्यति चिनोति देग्धिषु प्रादिषु तिष्ठतीति प्रादिस्थः तस्मात् निमित्तात् षकाररेफऋवर्ण
रूपात् परस्य नेर्णत्वं गदादिषु परेषु गद व्यक्तायां वाचि णाद् अव्यक्ते शब्दे पत्लृ पतने पदगतौ एषां चतुर्णामपानिर्देशाद्यङ्·लुकि णत्वं न प्रनि जागदीति
प्रनिनानदीति अपिद्दादेति चत्वारः डुदाञ् दाने प्रणिददाति दाण् प्रणियच्छति दो प्रणिद्यति देङ्·प्रणिदयते धारूपौ द्वौ धेट् प्रणिधयति डुधाञ् प्रणिद
धाति षा गति निवृत्तौ माङ् माने मेङ् प्रणिदाने षो अंतकर्म्मणि हन् हिंसागत्योः या प्रापणे वा गतिगंधनयोः द्रा कुत्सायाम् प्सा भक्षणे डुवपू बीजसंतानेवह १८
प्रापणे शमु उपशमे चिञ् चयने दिह उपचये स्यत्यादीनामेकादशानां स्तियानिर्देशाद्यङ्लुकि णत्वं न प्रणि सासेति प्रनि जंघनीतीति अन्यत्राकखादावषां

सिं.चं. आद्योच्चारणे वा आदौ भवा आद्याः आद्यानां पाणिनिकात्यायनपतंजलीनामुच्चारणमाद्योच्चारणं तस्मिन् कादिखादिषांतवर्जे गदनदादेरन्यस्मिन् धातोप
आ.व. रेप्रादिस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा क श्च ख श्च क खौ ता वादी यस्य स कखादिः कखादेरन्यो ऽकखादिस्तस्मिन् षो ऽतो यस्य स षांतस्तस्मादन्यो ऽषां
१० तस्तस्मिन् अकखादौ किम् प्रनिचकार प्रनिचखाद अषांते किम् प्रनिपेक्ष्यति रद विलेखने लेखनं भेदनम् लोपः पचां किते चास पचामीति बहुवचनेन पंच
प्रकारा धातवो गृह्यंते यथा पच् धातुरेक हसमध्यस्थाकारवान् लिटि अनादेशादिश्च तथान्येपि धातवः अस किम् दिदिवतुः ररासे अनादेशादीति कि

आद्योच्चारणे किम् प्रणिचखाद प्रनिचकार प्रणिगदति अगदीत् रद विलेखने ररद तिरदेत ररदतु अरदत् ररादलोपः पचां किते
चास्य पचादीनां किति लिट्यनादेशादीनां पूर्वस्य लोपो भवत्यकारस्य एकहसमध्यस्थस्य चैकारः किति णादौ सेदिथीपि च रेदतुः रेदि
थ णाद अभ्यनेकेश ब्दे प्रणिनेदुः नेदिथ अर्द गतौ याचने च आम्वोर्णादौ नुगशां अश्नोतेर्ऋकारादेः संयोगान्ताकारादेश्च पूर्वस्य नुग्भव
ति णादौ आनर्द आर्दीत् नर्द गर्द शब्दे तर्द हिंसायां तर्दति कर्द कुत्सिते शब्दे कर्दति खर्द दंदशूके खर्दति १ ऋदि चेष्टायां किदिप
रिदेवने क्लिन्दति अत सातत्यगमने आति अर्थ खाद भक्षणे अखादीत् क्रदि आह्वाने रोदने च अंति अदि बन्धने अन्तति अन्तेत् अ
न्ततु आंतत् आनंत आनंद अंद्यात् अंदिता अंदिष्यति आन्दिष्यत् आंदीत् ॥ मचकणतुः एकशब्दो ऽत्र ऽसहायवचनः एकौ च
तौ हसौ च एकहसौ तयोर्मध्यस्थः एकहसमध्यस्थस्तस्य एकहसः किमतत्सरतुः सरछ्रगनौ आम्वोर्णादौ नुगशाम् अशूङ् व्याप्तौ अशमिनि बहुवचनमा
द्यर्थं संयोगांतो यस्य स संयोगांतः स्वर आदिर्यस्य स स्वरादिः संयोगांतश्चासौ स्वरादिश्च संयोगांतस्वरादिस्तस्य अत सातत्यगमने सततस्य भा राम
वः सातत्यं सातत्येन गमनं सातत्यगमनं तस्मिन् खाद भक्षणे क्रदि त्वान्नेरित रत्यङ् काप्यन् अचखादत् ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ॥ १०

म

टुणदि समृद्धौ इति द्वितो धुरित्यत्राणुप्रत्ययार्थः नंदथुः इदित्वान्नस्य लोपो न नंद्यात् वदि आल्हादने दीप्तौ च हर्षे तेजसि चेत्यर्थः क्लिदि परिदेवने परिदेवनं शोकः इदि परमैश्वर्ये ईश्वरस्य भाव ऐश्वर्यं ष्यञ्ः परा उत्कृष्टा मा लक्ष्मीर्यस्य तत् परमं परमं च तदैश्वर्यं च परमैश्वर्यं तस्मिन् स्वरादेः द्वितीयाद्वडि सनुवृत्तं स्वर आदिर्यस्य स स्वरादिस्तस्य आरंभसामर्थ्यात् द्वितीयो डिरित्यर्थः अटं विना स्वरादित्वमिह विवक्षितमन्यथादिवादावडिसंग्रे अदिचेति सूच्यताम् कासादिप्रत्ययादाम्कृस्भूपरः कास शब्दकुत्सायां आस उपवेशने दय दाने अय गतौ गुरु श्चासौ नामी च गुरुनामी गुरुनामी आदिर्यस्य स गुरुनाम्यादिः द्वी तुः प्रत्ययग्रहणमनेकस्वरोपलक्षकम् एभ्य आम्प्रत्ययः स्यात् कीदृशः कृसभुवः परे यस्मात् स कृस्भूपरः इत्यर्थकथनेन विपर्यासव्यवहितयोर्निवृत्तिः कथिता कथं तर्हि तं पातयां

टुणदि समृद्धौ ननन्द चदि आल्हादने दीप्तौ च इदितो नुम् चन्दति चंदेत चंदतु अचन्दत् चचंद चंद्यात् चंदिता चंदिष्यति अचंदिष्यत् अचंदीत् शुध शुधे शुंधति शुंधेत शुंधतु अशुंधत् शुशुंध शुंध्यात् शुंधिता शुंधिष्यति अशुंधिष्यत् अशुंधीत् नक्क कक्क हसने तकि कृच्छ्रजीवने तंकति ततंक अतंकीत् शुक गतौ शोकति अशोकीत् बुक्क भषणे बुक्कति कष हसने कषति युगि जुगि वर्जने युंगति इदि परमैश्वर्ये इंदति स्वरादेः स्वरादेर्धातोर्द्वितीयोऽडागमो भवति द्विवादौ परे अ इ उ ए ऐ ओ ऐन्दत् कासादिप्रत्ययादाम्कृस्भूपरः कास् आस् दय अय गुरुनाम्यादेरनेकस्वरेभ्यो णवादौ परे आम् प्रत्ययो भवति स च कृ अस् भूपरः प्रयोक्तव्यः ॥ प्रथममासपपातपश्चात् प्रभ्रंशयां यो नहु पंचकारेत्यादिप्रयोगः प्रमाद एव कृसभुवां क्रियासामान्यवाचित्वादाम् प्रकृतीनां क्रियाविशेषवाचित्वात् तदर्थयोरभेदान्वयो भवति सामान्यविशेषयोरभेदान्वयो लोकतः सिद्धोस्ति एवं च इंदांचकार इंदांबभूव इंदामास एक एक त्वेकाभूताः नद्यतनपरोक्षा परमैश्वर्याभिन्ना क्रियेति तु स्यो बोधः ननु करोतिस्सकर्मकः भवतिस्त्वकर्मकः कथं द्वयोस्तुल्यबोध इति चेदत्राहुः यदा हि करोतिरुत्पादनार्थकः स्यात् तं त्र्येण प्रयुज्यते तदा तस्य नियमेन सकर्मकत्वं भवति घटं चक्रे राज्यं चकारेत्यादौ यदा तु क्रियांतरसमानाधिकरणः करोतिः प्रयुज्यते तदा यस्समानाधिकरणः करोतिस्तत्सकर्मकत्वाऽकर्मकत्वाभ्यां

सि क
आ उ
११

कृत्वास्वयमपि तथा सकर्मका ऽकर्मक भा— वौ भजते जुहवांचकारेति एवं भ्वस्योरप्याम्प्रकृतिसमानाधिकरणत्वेन क्वचित्सकर्मकत्वं बोध्यम् तथा च तस्यागतप त्वं विभरांबभूव इति माघः तपर्तु पूर्त्तावपि मेदसां भराविभावरीभिर्विभरांबभूविरे इति श्री हर्षश्च इत्यत्र क्रियान्तरसमानाधिकरणाद्भवतेः सकर्मकत्वात् कर्मणि लिट् एवं चाम् प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलमिति गुरुनाम्यादि किम् इयेष अनेकस्वरेति किम् अरवाच चारेति औ त्स्यच प्रत्ययांतत्वेप्यनेकस्वरत्वाभावादाम् न॥ ॥ ॥ ॥ विद दरिद्राजागृपांवा एभ्यो वा ऽऽम् दरिद्राजागर्त्योरनेकस्वरत्वान्नित्यप्राप्ते वेत्योषस्योश्च

विद दरिद्रा जागृ पा वा रः पूर्वस्य ऋवर्णस्याकारः धातोर्नामिनः नाम्यंतस्यादंतस्य च धातोर्वृद्धिः ञ्णितिपरे इंदांचकार इंदांचक्रतुः इंदांचक्रुः इंदांचकर्थ इंदामास इन्दामासतुः इंदामासुः इंदांबभूव इंद्यात् ऐंदीत् निदि कुत्सायाम् इदितो नुम्॥ प्रपूर्वः प्रणिन्दति प्रनिन्दति प्रनिंदेत् प्रणिन्दतु प्राणिन्दत् निनिन्द निंद्यात् निन्दिता निंदिष्यति अनिन्दिष्यत् अनिन्दीत् रवि पावने दंदंघ उरव गतौ अपृक्तं ... उपधालघोर्गुणः ओखति ओखेत् ओखतु औखत्॥ ॥ ॥ ॥

प्राप्ते विकल्पः विद ज्ञाने दरिद्रा दुर्गतौ जागृ निद्राक्षये उषदाहे आमो मस्यनेत्वम् श्यासकासोराम् विधानात् ज्ञापकात् रः ऋ अ इति छेदः पूर्वस्य ह्रस्वदिः शेष इत्यनः पूर्वस्येत्यनुवृत्तम् धातोर्नामिनः आदिस्वरस्यान्त्यतो वृद्धिरिति ञ्णितीति चानुवृत्तं अत्र हि स्वरस्येति पदमनुवृत्त्य वाक्यभेदेन व्याख्येयं तेन स्वरांतस्य धातोर्वृद्धिः ञ्णिति तेन श्वानमाचष्टे शावयति विद्वांसं विद्रावयती त्यादि सिद्धम् अदंतस्येति अत उपधाया इस्वत्रात इति योगविभागा त्तस्येहाकर्षणाद्वा लब्धं तेन च अंकायतीत्यादि सिद्धं ॥

राम
११

असवर्णे स्वरे पूर्वस्यैव र्णो वर्णयोरियुवौ धातोः पूर्वस्यैव र्णो वर्णयोरियुवौ भवतः असवर्णे स्वरे पूर्वं हि त्वपश्चादुकारस्योपधाया लघोरिति गुणे कृते पूर्वस्याव्
उवोरुवङ्कित्वाद्गुणाभावे ऊरुवतुः अत्र उ उरुव् अतुस् इति स्थिते पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायात् पूर्वस्य ह्रस्वस्यापि ह्रस्वे कृते सवर्णे दीर्घः ततो ह्रस्वः इ
ति पुनर्ह्रस्वो न लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते इत्युक्तत्वात् नुगशामिति नुक् आन ञ्चगतौ नोलोप इति न लोपः अच्यात् आञ्छि आयामे आयामो दैर्घ्यम्॥ आञ्छे
र्नुग्वा आञ्छेः पूर्वस्य नुग्वा नुगशामिति नित्ये प्राप्ते विकल्पः शसदद्वादिगुणभूताकाराणां नेत्वपूर्वलोपौ एषामेत्वपूर्वलोपौ न शसु हिंसायाम् ददं स्याताः दद

असवर्णे स्वरे पूर्वस्यैव र्णो वर्णयोरियुवौ। उवोरुवं ऊरुवतुः। ऊरुवुः। उवोरिवय। औरवीत्। लुंच अपनयने। अञ्चु गतिपूजनयोः। अञ्चति। अंचे
त्। अंचतु। आंचत्। आनंच। अच्यात् पूजायां। अंच्यात्। अंचिता। अंचिष्यति। आंचिष्यत्। आञ्चीत्। आञ्छि आयामे॥ आंछति।
आंछेत्। आंछतु। आञ्छेर्नुग्वा नादौ। आंछ। हृर्छा कौटिल्ये विहसे हूर्छति। हूर्छेत्। हूर्छतु। जुहूर्छ। हूर्छ्यात्। हूर्छिता। हूर्छिष्यति।
अहूर्छिष्यत्। अहूर्छीत्। पुच्छ प्रमादे। पुच्छति। वज गतौ। शसदद्वादिगुणभूताकाराणां नेत्वपूर्वलोपौ। ववाज। ववजतुः। अवा
जीत्। व्रज गतौ। व्रजति। व्रजेत्। व्रजतु। अव्रजत्। वव्राज। व्रज्यात्। व्रजिता। व्रजिष्यति। अव्रजिष्यत्। वदिव्रजोः सौ नित्यं वृद्धिः। अव्रा
जीत्। अज गतौ क्षेपणे च। अजति। अजेत्। अजतु। आजत्॥

दानेवकारोऽदंतो ष्वः आदौ यस्य सत्वादिः गुण शब्देन भूत उत्यादिनः गुणभूतः गुणभू
तश्चासौ अकारश्च गुणभूताकारः शशरतुरित्यादौ गुण शब्देन क्रियमाणोऽरुन दवयवोकारः लुलविथेत्यादौ तु गुण शब्देन क्रियमाणो यओकारस्तत्स्था
निकत्स्यादेशस्याव यवोकारस्तस्यैत्वपूर्वलोपौ न वदिव्रजोः सौ नित्यं वृद्धिः एतयोर्नित्यं वृद्धिः सौ परे अतो हलादेरिति विकल्पे प्राप्ते नित्यविधानं॥

अजेरस्वचतुर्थु वीवसादौ वा अजेर्वी स्यादेशोऽनपि वसादावनपित्तु वा गुरुत्वात् सर्वादेशः नुधातोः य्वोर्धातोरिति सूत्रं य्वौ वेति चानुवृत्तं क्ङु प्रत्यय संबंधिनोनुइ
यसनग्रहणं निरनुबंधकग्रहणेन सानुबंधकस्येत्युक्तत्वात् शुस्नुताविति धातोरपि न कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणमिति परिभाषितत्वात् परिशेषान्नुइ
स्यस्य विकरणस्य ग्रहणं नुप्रत्ययांतस्य धातोश्चेवर्णोवर्णयोरियुवौ अनेकस्वरस्यासंयोगपूर्वस्य तु नोर्द्वौ नो श्चेवर्णोवर्णयोर्य्वौ धातोर्विहिते स्वरादौ परे शक्नुवंति शि
प्रियतुः क्रुवंति असंयोगपूर्वस्यानेकस्वरस्य नृसुन्वंति निनिप्यतुः जुह्वति अनेकस्वरस्येति किम् रियति पियति रिपिगतौ रुवंति नुप्रत्ययांतस्यानेकस्वरत्व व्यभिचारात् प्र
त्युदाहरणं न धातोर्विहिते इति किं धी शौ हुन्वोरेवापि अपि अपविषये चतुर्षु अनेकस्वरस्यासंयोगपूर्वस्य धातोरुवर्णस्य वत्वं न हुन्वोरेव यत्वं चतुर्षु

अनेरस्वचतुर्थु वीवसादौ वा वि वायनुधातोः विकरणस्य नोर्धातोश्चेवर्णोवर्णयोरियुवौ स्वरे अनेकस्वरस्यासंयोगपूर्वस्य तु य्वौ उवर्णान्ते
हुन्वोरेवापि विव्यतुः स्वरान्तादत्वतश्च नादौ नित्यानिटस्थपो वेट् विवयिथ विवेथ आजिथ विव्यथुः विव्य आजिव आजिम वीयात्
नैकस्वरादनुदात्तात् ३ आद्योच्चारणेनुदात्तादेकस्वराद्धातोः परस्य वसादेरिण न स्यात् ॥ अनपित्तु जुहुवतुः
विव्यतुरित्यत्र य्वोर्विहसे इति दीर्घो न यत्वस्यासिद्धत्वात् स्वरांतादत्वतश्च नादौ नित्यानिट्स्थपो वेट् स्वरांतात्तादौ नित्यानिट आद्योच्चारणेऽत्वतस्ता
दौ नित्यानिटश्च धातोः परस्य थप इड्वा भवति अत् विद्यते यस्य सः अत्वान् तस्मात् स्वरांतात् किम् बिभेदिथ थपः किम् पपिव तादौ नित्यानिटः किम् सस्व
र्थ सस्वरिथ स्वरतिसूती त्यनेन वेट् कोयं आद्योच्चारणे इति किं चकर्षिथ अत्वतः किं बिभेदिथ तपरः किम् रराधिथ ताद्वाविति किम् जग्रहिथ वृः सेट् त्यनेन
सप्रत्ययेऽयं नित्यमनिट् नित्यानिटः किम् आनंजिथ उदित्वाद्वेट् कोयम् नैकस्वरादनुदात्तात् आद्योच्चारणे इत्युभयत्रान्वेति आद्योच्चारणेऽनुदात्तादेकस्वरा राम
द्वेत्यर्थः तेन बिभत्सतीत्यत्रसांते अनेकस्वरत्वे पीण्निषेधो भवत्येव ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १२

अथानुदात्ताः स्वरांतो धातुरनिट् भवति न इट् यस्मात् सोऽनिट् इति भवद्भिर्दृश्यतां ज्ञायतां तु पुनः स्वरांतेष्विमान् धातून् सेटः प्रवदंति तान् विदंतीति तद्विदः नाना हअं इंतं धातु कथवाक्य प्रबंधे इत्यादि ऋदंतं कृ विक्षेपे इत्यादिकं ऋतां मध्ये वृङ् वृ औ सेटौ वृङ् संभक्तौ वृञ् वरणे अथ वर्णेषु इवर्णांतेषु श्विडीङ् सेट् कथ्यते श्वि डीङ् चानयोः समाहारः श्विडीङ् टुओश्वि गतिवृद्ध्योः डीङ् विहायसा गतौ पुनस्तेषु शीङ् श्वि आवपि सेटौ कथ्येते शीङ् स्वप्ने श्रिञ् सेवायामिति १ गणोतिष्ठनीति गणस्य तं गणस्थं ऊदंतं धातुं भूलू प्रभृति किंच पुनः उतां उकारांतानां मध्ये रु ष्णु वौ सेटौ रु शब्दे रुङ् गतिरेषणयोरित्युभयं ष्णु प्रस्रवणे तथा क्षुवं ट्क्षु शब्दे रु णौति ऊर्णुञ् आच्छादने भयोः युणु क्ष्णवः धातून् सेटः युमिश्रणादौ अयं सेट् युभ बंधने कैयादिकस्त्वनिट् णु स्तुतौ क्ष्णु तेजने प्रवदंतीत्यनेनान्वय इति अमुना प्रका

अनिट् स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः अदन्तमृदन्तमृतां च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि १ गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवं तथोर्णोतिमथो युणुक्ष्णवः इति स्वरान्ता निपुणैः समुच्चितास्ततो हसान्तानपि सन्निबोधत २ शकिस्तु कान्तेष्वनिडेक इष्यते घसिश्च सान्तेषु वसिः प्रसारणी रभिश्च भान्तेष्वथ मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरे ३ यमिर्यमान्तेष्वनिडेक इष्यते रमिश्च यश्च श्यनि पठ्यते मनिः नमिश्चतुर्थो हनिरेव पञ्चमो गमिस्तु षष्ठः प्रतिषेधवाचिनाम् ४ ॥ रेणनिपुणैः विचक्षणैः स्वरांता धातवः समुच्चिताः एकीकृताः ततोऽनंतरं हसांतान् धातून् अनिटः सकाशात् यूयं निबोधत जानीत लोटो मध्यमपुरुषस्य बहुवचनं २ अथ हसांतान् धातूनाह कांतेषु शकिः एकः अनिट् शक्ल शक्तौ शक मर्षणे दैवादिकस्तु सेट् सांतेषु घसिः घस्लृ अदने अदादेशो घसिश्च तु पुनः वसिः प्रसारणी वस निवासे प्रसारणे संप्रसारणमस्यास्तीति प्रसारणी एतेन वस आच्छादने आदादिकः सेट् तस्य संप्रसारणाभावात् भांतेषु रभिः रभ राभस्ये अथ मैथुने यभिः यभ मैथुने ततस्तृतीयो लभिः अनिट् डुलभष् प्राप्तौ अनिट् इष्यते इत्यन्वयः इतरे धातवो निषेन ३ अमांतेषु अमप्रत्याहारांतेषु धातुषु प्रतिषेधवाचिनां इट् निषेधकानां मध्ये एकः अनिट् यमिः यम उपरमे रमिश्च रमु क्रीडायां अपि दिवादौ दिवादि गणे यः मनिः विचक्षणैः पठ्यते स मनिः मन ज्ञाने दैवादिकः मनु अवबोधने तानादिकः सेट् चतुर्थो नमिः णम प्रह्वत्वे शब्दे च पंचमो हनिः हन हिंसागत्योः तनस्तु षष्ठो गमिः ग

सि॰कौ॰ इत्यनिट्कारिकायामिमेऽनिटोऽष्टौ धातवो हान्ता मया कीर्तिताः कथिताः कीदृशाः मुक्तः संशयो येषु ते मुक्तसंशयाः किं कृत्वा गणेषु हांतान् प्रविभज्य भिन्नीकृत्य ते
आ॰३ के दिहिः दिह उपचये दुहिः दुह प्रपूरणे दुहिरिति दुहिर् अर्दने भौवादिको न गृह्यते सानुबंधकत्वात् आदादिक एवानिडिति प्राञ्चः मेहति रोहती मिह
१२ सेचने रुह बीजजन्मनि प्रादुर्भावे च वहिः वह प्रापणे तु पुनः षष्ठो नहिः णह बंधने दहतिः दह भस्मीकरणे तथा लिहिः लिह आस्वादने ५ पुराणगाः प्राचीनाः
विद्वांसः गणपाठेषु शांतान् अनिट्कान् दशैव पठंति इतरान् न तान् कान् दिशिं दिश अतिसर्ज्जने दृशिं दृशिर प्रेक्षणे दशिं दंश दंशने अथो मृशिं मृश आमर्शने स्पृशिं
स्पृश संस्पर्शने रिशिं रुशिं रिश रुश हिंसायां अष्टमं क्रोशतिं क्रुश आव्हाने रोदने च विशिं विश प्रवेशने लिशिं लिश अल्पीभावे दिवादिस्यो लिश गतौ तुदादिस्य इत्युभयं ईत

दिहिर्दुहिर्मेहतिरोहती वहिर्नहिस्तु षष्ठो दहतिस्तथा लिहिः । इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्तिताः ५ दिशिं
दृशिं दंशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशति मष्टमं विशिम् । लिशिञ्च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् ६ रुधि
स्सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यति बुध्यती व्यधिः । इमे तु धान्ता दश चानिटो मतास्ततः परं सिध्यतिरेव नेतरे ७ शि
षिं पिषिं शुष्यति पुष्यती त्विषिं विषिं श्लिषिं तुष्यति दुष्यती द्विषिम् । इमान् दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान् कृषकर्षतीतथा ८

ध्यान्ता धातव इमे दशानिटो मताः कथिताः ते के रुधिः रुधिर् आवरणे अनो रुध कामे इति दैवादिकः इत्युभयं सराधिः राध संसिद्धौ युधिः बंधि साधयः युध संप
हारे बंध बंधने साध संसिद्धौ क्रुधि क्षुधी क्रुध् कोपे क्षुध बुभुक्षायां शुध्यति बुध्यती शुध शौचे बुध अवगमने दैवादिकौ बुधिर् बोधने इति बुध अवगमने इ
ति तौ भौवादिकौ तु सेटौ व्यधिः व्यध ताडने ततः परं सिध्यतिरेव षिधु संराध्यौ अनिट् षिधु गत्यां षिधू शास्त्रे मांगल्ये च तौ भौवादिकौ सेटौ ७ गणेषु गणपाठेषु राम
अनिड्विधौ अनिट्प्रकरणे षांतान् इमान् दशैवाचार्या उपदिशंति तान् शिषिं शिष्लृ विशेषणे पिषिं पिष्लृ संचूर्णने शुष्यति पुष्यती शुष शोषणे पुष पुष्टौ दैवा १३

विषिं विऌ व्याप्तौ जौ हौ त्यादिकः श्लिषिं श्लिष आलिंगने श्लिष दाहे भौवादिकः सेट् तुष्यति दुष्यती तुष तुष्टौ दुष वैकृत्ये दैवादिकौ द्विषिं द्विष अप्रीतौ तत्याक्तृषिकर्ष
तौ कृष विलेखने भौवादिकतौ दादिकौ ४ स्वरेण नीचेन अनुदात्तस्वरेण गणितान् पांतान् अनिटः त्रयोदशत्वं प्रतीहि जानीहि त्वा नाह तपिं तप संतापे तप ऐश्वर्ये दै
वादिकः तप दाहे इति चौरादिको पि णिच् प्रत्ययाभावपक्षे ऽनिट् तिपिं तिप क्षरणे च पुनः आपिं आऌ व्याप्तौ अथो वपिं डुवप् बीजतंतुसंताने स्वपिं ञिष्वप् शये लिपिं लि
प उपदेहे लुपिं लुऌ छेदने तृप्यति दृप्यतीत्तृप प्रीणने दृप हर्षमोचनयोः एतौ दैवादिकावनिटौ तृप तृप्तौ दृप उत्क्लेशे एतौ दैवादिकौ सेटौ तृप तृप्तौ दृप संदीपने एतौ
चौरादिकौ च सेटौ सृप्लृ गतौ शपिं शप आक्रोशे शप उपालंभे च छुपिं छुप स्पर्शे क्षिपिं क्षिप प्रेरणे दैवादिकस्तौदादिकश्चानिट् ५ पांतान् धातून् अनिटः पंचदशत्वं प्र

तपिन्तिपि त्र्याप्यिमथो वपिंस्वपिंलिपिंलुपिं तृप्यतिदृप्यतीसृपिम् स्वरेणनीचेनशपिंछुपिंक्षिपिं प्रतीहिपांतान्गणितांस्त्रयोदश ६ अ
दिंहदिंस्कन्दिभिदिंछिदिक्षुदीन्शदिंसदिंस्विद्यतिपद्यतीखिदिम् नुदिन्तुदिंविद्यतिविन्तइत्यपि प्रतीहिदान्तान्दशपञ्च चा
निटः ७ पचिंवचिंमुचिंरिचिंरिचं सिचिं प्रच्छतीन्निजिंसिचिंमुचिंभजिंभञ्जिभृज्जतीन् त्यजिंयजिंयुजिंरुजिंसञ्जिंभञ्जतीन्भुजिंस्वजिं
तौ हि अवेहि त्वा नाह अदिं अद भक्षणे हदिं हद पुरीषोत्सर्गे स्कं दिभिदिंछिदिक्षु दीन् स्कंदिर् गतिशोषणयोः भिदिर् ॥ सृजिविजिविद्ध्यनिट् स्वरान् ११॥
विदारणे छिदिर् द्वैधीकरणे क्षुदिर् संचूर्णने शदिं शद्लृ शातने सदिं षद्लृ विशरणगत्यवसादनेषु दैवादिके खिद्यति पद्यति ञिष्विदा गात्रप्रक्षरणे पद गतौ दैवादिकः ञिष्विदा स्नेहनमोचनयोः
पदस्थैर्ये भौवादिकः सेट् खिदिं खिद दैन्ये खिद परिघाते रौधादिको दैवादिकस्तौदादिकश्चानिट् नुदिं नुद प्रेरणे तुदिं तुद व्यथने विद्यविनत्ति कावपि विद सत्तायां दैवादिः
विद विचारणे रौधादिकः विद ज्ञाने विदॢ लाभे एतौ सेटौ विद्य विनतीएव विद्य विनत्ति कौ स्वार्थिकप्रत्ययः ७ न विद्यते इट् स्वरो येभ्यस्ते ऽनिट्स्वराः तान् धातून् त्वं विद्धि जा पा
नीहि त्वा नाह पचिं डुपचष् पाके पचिं व्यक्तीकरणे च सेट् वचिं वच परिभाषणे ब्रुवो वचिर पिविचिरिंचिरं जिप्रच्छतीन विचिर् पृथग्भावे रिचिर् विरेचने रिच वियोजने ३६

सि. चं. नयोरिति चरं जोरागे प्रच्छ ज्ञीप्सायाम् निजिं णिजिर् शौचपोषणयोः णिजि शुद्धौ आदादिकः सेट् सिचिं षिच क्षरणे भुजिभजि भंजि भृज्जतीन् मस्जू मोक्षणे भजसेवायां
आ. दे. भंजो आमर्दने भ्रस्ज पाके स जिं त्यज हानौ यजिं यज देवपूजादौ युजिर् जिसंजि मज्जतीन् युजिर् योगे युज समाधौ इति च भाष्यमते युजो समाधौ सेट् रुज रोगे षंज
१४ संगे दुमस्जो शुद्धौ भुजिं भुज पालनाभ्यवहारयोः भुजो कौटिल्ये इति च स्वजिं स्वंज परिष्वंगे स्र जिविजि समाहारे एकवचनं सृज विसर्गे देवादिकस्तौदादिकश्चानिट् वि
जिर् पृथक्भावे ओविजी भयचलनयोः तौदादिकः सेट् चांताः षट् छांत एकः जाताः पञ्चदश ११॥ ॥इत्यनिट्कारिकाः॥ स्वरांतादलत श्वेति वेट् विवयिथ विवे
थ आजिथ विव्यिव विव्यिम वीयात् लुटि वेता अजिता वेष्यति अजिष्यति अवेष्यत् आजिष्यत् धातोर्नामिन इति वृद्धिः अवैषीत् आजीत् क्षि क्षये अकर्मकः ण्यन्तर्भावि
वेता अवैषीत् क्षि क्षये चिक्षयिथ चिक्षेथ अनपि य कारे परे पूर्वस्वरस्य दीर्घः स्यात् क्षीयात् अक्षैषीत् तुम्प हिंसायाम् प्रातुम्पने स्सुट् गवि
कर्तरि प्रस्तुम्पति गौः अदृष्टि सव्यवधानेपि सुट् प्रास्तुम्पत प्रतुस्तुम्प ओणृ अपनयने ओणाञ्चकार वन षन सम्भक्तौ ववनतुः अवनीत् अवानीत्
सेनतुः जन सन खनां मात्वमनिटि सेङ्ङ्किति झसे हेच कौ या दादौ ङ्कि ति वा सायात् सन्यात् असनीत् असानीत् चमु अदने ष्ठिवु क्लमु
चमां दीर्घोऽपि आचामति आङ् वि मं च मति विचमति चेमतुः अचमीत् ॥ तत्र्यर्थस्तु सकर्मकः तुधानोरितीयू चिक्षियतुः अनपि यकारे परे पसेदीर्घ इत्यतो दीर्घ इति
अनपीति चानुवर्तते अनपि ये किं चिन्न यान् संज्ञापूर्वकस्य विधेरनित्यत्वाद्धात्र न दीर्घः क्षि निवासगत्योरिति तौदादिकः प्रातः तुंपतेः सुट् गवि कर्तरि प्रादुप
सर्गात् परस्य तुंपतेः सुट् स्यात् गौः कर्ता चेत् नकरसंयोगादिति लिटः कित्वाभावान् नस्य लोपो न तुतुंपतुः आशिषि नो लोप इति न लोपः तुप्यात् स्तिपा निर्देशात्
यङ् लुकि सुट् न प्रनो तुंपीति ओणृ अपनयने अपनयनं दूरीकरणं वन षन संभक्तौ वन शब्दे च संभक्ति भजनम् जन सन खनामात्वं सेङ्ङ्किति झसे यादौ ङ्कि
तिवा जनजनने जुहोत्यादिः जनी प्रादुर्भावे दिवादिः उभयोर्ग्रहणं एषामात्वं स्यात् अनिटि सप्रत्यये किति ङिति झसे च यकारादौ ङ्कि तिवा सेपरे सिषासति षिष्ठिवु

राम
१४

षिवु निरसने निरसनं थूत्करणम् नाम धातुष्वष्क षिवांसत्वं न ष्वष्क गतौ नाम धातो रुदाहरणानि षट् दंता असेति षोडन्तमाचष्टे नाम्नो णिडिन् करणे इति णिप्रत्यये
टिलोपश्च षोडयति षंडमाचष्टे करोति वा षंडयति नाम्नो य इति य प्रत्यये षंडमिच्छतीति षंडीयति कटे वर्षावरणयोः वर्षो वृष्टिः आवरणमाच्छादनं ह्म्यंतक्षणश्वस् जागृ ण्वे
दितां सेटि सौ न वृद्धिः ह्मयमयच्यु च ह्म्यः ते अंते येषां ते ह्म्यंताः एत् इत् यस्य स एदित् हमयांतस्य क्षणादेरेदित श्वयतेर्वृद्धिर्न सेटि सौ ग्रह उपादाने अग्रहीत् टुवम उद्गिरणे अ
वमीत् हय गतौ अहयीत् क्षणु हिंसायाम् अक्षणीत् श्वस प्राणने अश्वसीत् जागृ निद्राक्षये अजागरीत् टुओश्वि इ गतिवृद्ध्योः अश्वयीत् सेटि सौ किं दह भस्मीकरणे अधाक्षी

षिवु निरसने नाम धातुष्वष्क षिवांसत्वं न ष्ठीवति ष्ठिवेः पूर्वस्य ठस्य थो वा तिष्ठेव टिष्ठे वष्वोर्विहसेष्ठीव्यात् अष्ठेवीत् कटे वर्षाऽऽवरणयोः ह्म्य
न्तक्षणश्वसजागृश्वेदितां सेटि सौ न वृद्धिः अकटीत् हय गतौ अहयीत् गुरं हसि नानप्योर्वः अनपि विषये उव र्णस्य वत्वं न्न जुजुवतुः जुजवियजु
जोथ अजोषीत् गुपू रक्षणे आयः गुपूधूपविच्छिपणिपनिभ्यस्वार्थे आयः प्रत्ययः अनपि तु वा स धातुः यङादिप्रत्ययान्तः शब्दो धातुसंज्ञ
को भवति गोपायति गोपाया अकारजुगोपायतः यस्यात श्चानपि लोपः गोपाय्यात् गुप्यात् गोपायिता गोपिता गोप्ता अगोपायीत् अ
गोप्सीत् झसात् अगौप्ताम् एवं धूप संतापे तप संतापे तेपिथ ततप्थ अताप्सीत् जप जल्प व्यक्तायां वाचि जेपिथ जपिता अजापीत् कसु
तु रंहसि रंहो वेगः नानप्योर्वः उवर्णांतस्य धातोर्वत्वं न स्यात् अनपि परे गुपू रक्षणे रक्षणं पालनं आयः गुप्पः इत्यनुवृत्तं पणिपन्योरनुदात्ते ॥ पादविक्षेपे ॥
च आया भावे चरितार्थमात्मनेपदमित्यायान्ताल्लाङ्भवति गुपू रक्षणे धूप संतापे विच्छ गतौ पण व्यवहारे स्तुतौ च पन च स धातुः तच्छब्देन यङादिः परामृश्यते यङा
दिना च प्रत्ययग्रहणपरिभाषया तदंतं गृह्यते तेषां केवलानां संज्ञा प्रयोजनाभावाद्धातुः यङ् घकाम्या ईयङ् चेति यगाय णिजि यीङः स्तया आचारे क्विबथो य श्वज्ञेयादश
वडादयः प्रत्ययविशिष्टस्य धातुत्वान्निवादिः यतः यच अच्चानयोः समाहारो यं तस्य धातोर्विशेषणत्वात् तदंतविधिः यंतस्य अदंतस्य च लोपः अनपि अदंतस्य किं अय

सि॰ कौ॰ पिबवयोर्वसेहकारेतियलोपेनुकिचक्रुतेयइस्यलोपोमाभूत् अतएव ऊदित्वादिट् गोपितागोप्ता इड्भावपक्षे अनिटोनामिवत् इतिवृद्धिः अगोप्सीत् क्रमुपादवि
आ॰ उ॰ क्षेपे पादविक्षेपः पादविहरणं ॥ ॥ भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषांयोवाकर्त्तर्यैषुचतुर्षुप्राप्ताप्राप्तविभाषेयं अनवस्थानार्थोत्रसिः क्लमित्रसीच
१५ दिवादयस्तेभ्योनित्येप्राप्तेइतरेषामप्राप्ते भ्राशृभ्लाशृदीप्तौ फणादावेतौ भ्रमुचलने भ्वादिर्ज्वलादिश्च त्रसुअनवस्थाने दिवादिः त्रुटादिः शमादिःतत्र
भ्वादेः भ्रमति भ्राम्यति शमादेस्तु शमादीनामितिदीर्घेभ्राम्यति इतितत्ररूपं क्लमुग्लानौ त्रसीउद्वेगे त्रुटच्छेदने लषकांतौ क्रमःपेदीर्घोऽव्विषये क्रमोदीर्घःस्यात् पेचत्
र्षुपे किं उपक्रमते प्रोपाभ्यामित्यात् स्तुक्रमोरातिनेट् स्तुक्रमोरुदात्तत्वादिटिसिद्धे नियमार्थोयम् आभ्यांपरस्मैपदेस्यवेट्स्यान्नातः स्नुप्रश्रवणे उपस्नोष्यते ज

भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषांयोवाकर्त्तर्यैषुचतुर्षुक्रमःपेदीर्घो ऽव्विषये क्राम्यति क्रामति अक्रमीत् यमउपरमे गमांछः ग
मयमइषूणांछः स्यात् शिविषये यच्छति येमिथ यंयथ येथ यमिरमिनमातांसक्सेरिट्पे अयंसीत् अयंसिष्टां गमप्रह्वत्वेशब्देचनेमिथ।
ननंथ अनंसीत् ईर्ष्यईर्ष्ये ईर्ष्यायां ईर्ष्यति ऐर्ष्यीत् ऐर्ष्यीत् गम्लृगतौ गच्छति गमांस्वरे गम्हन्जन्खन्घसामुपधायालोपःस्या
त्स्वरेङिति न तु ङे जग्मतुः जगमिथ जगंथ हन्नृतःस्यपः हंतेःऋदंताच्चपरस्यस्यपइड् वतिगमेस्तु पेगमिष्यति ॥ ६ ॥ ७ ॥ ६ ॥

